International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2022; 8(5): 215-217
© 2022 IJSR
www.anantaajournal.com
Received: 01-07-2022
Accepted: 05-08-2022

**वि . टि. हरिप्रसादः**
शोधप्रबन्धछात्रः,
एस्. सि. एस्. वि.एम्.वि,
(श्रीचन्द्रशेखरेन्द्रसरस्वति
विश्वमहाविद्यालयः), एनात्तूर्,
काञ्चीपुरम्, तमिल नाडु, भारत

Corresponding Author:
**वि . टि. हरिप्रसादः**
शोधप्रबन्धछात्रः,
एस्. सि. एस्. वि.एम्.वि,
(श्रीचन्द्रशेखरेन्द्रसरस्वति
विश्वमहाविद्यालयः), एनात्तूर्,
काञ्चीपुरम्, तमिल नाडु, भारत

# अमरकोशस्थाः अधिकपाठाः

## वि . टि. हरिप्रसादः

## प्रस्तावना

संस्कृतकोशग्रन्थेषु कनिष्ठिकाधिष्ठितं स्थानमावहति अमरसिंहेन विरचितं नामलिङ्गानुशासनम् नाम पर्यायकोशम्। अमरसिंहेन कृतम् कोशम् इत्यर्थे अथवा अमरभाषापदानां कोशमित्यर्थे वा पश्चात् अमरकोशमिति प्रसिद्धस्यास्य संस्कृतभाषायां तथा विविधायां प्रादेशिकभाषायाञ्च वैविध्यपूर्णानि अनेकानि व्याख्यानानि समुपलभ्यन्ते।तेषु

1. क्षीरस्वामिनः अमरकोशोद्घाटनम्,
2. लिङ्गसूरिणः अमरपदविवृतिः,
3. महेश्वरस्य अमरविवेकः अथवा माहेश्वरी,
4. भानुजीदीक्षितस्य रामाश्रमी इत्यपराभिधा व्याख्यासुधा,
5. मल्लिनाथस्य अमरपदविवेकः,
6. रायमुकुटस्य पदचन्द्रिका,
7. परमानन्दमैथिलीकृता अमरचन्द्रिका,
8. रामकृष्णदीक्षितस्य पीयूषव्याख्या,
9. सर्वानन्दस्य टीकासर्वस्वम्,
10. वेदान्तमहादेवस्य बुधमनोरमा,
11. शिवदत्तशर्मणः नामचन्द्रिका,

च संस्कृतटीकासु प्रमुखाः प्रायेण मुद्रिताश्च सन्ति। इतःपरं सुभूतिः,कलिङ्गः,सर्वधरः, राजदेवः, गेवर्धनः, द्राविडः, भोजराजः, अभिनन्दः, नीलकण्ठः, अरुणः, भगीरथः,जयादित्यः, कोलाहलाचार्यः,शबरस्वामि, रामतर्कवागीशः, नयनानन्दः, रघुनाथचक्रवर्तिप्रभृतीनां विदुषां अपराः अमरकोशटीकाश्च समुपलब्धाः इति शब्दकल्पद्रुमाख्यस्य कोशस्य भूमिकायां तत्कोशकारेण सूचितमपि दृश्यन्ते। अन्यासां भारतीयभाषाटीकानां मध्ये लिङ्गाभट्टीयम् (तमिलु), अमरपदार्थदीपिका (तेलुगु), बालप्रिया, त्रिवेणी, पारमेश्वरी (मलयालम्) इत्येताः टीकाश्च प्रसिद्धाः भवन्ति। अमरकोशस्य टीकायाः एतादृशं वैपुल्यं कोशस्यास्य प्रामाणिकतायाः महत्वस्य च मकुटोदाहरणमस्ति। तथापि एतासु संस्कृत-भाषाटीकासु वर्गविभजने श्लोकसंख्याविषये च तुल्यता नास्ति। प्रक्षिप्तानां श्लोकानाम् आधिक्यमेव एतादृशस्य असमत्वस्य कारणम्। केचिद् वर्गद्वयम् एकीकृत्य पठन्ति। अपरे विषयवैविध्यम् अधारीकृत्य वर्गविभजनं च कुर्वन्ति। प्रथमकाण्ठे शब्दादिवर्गे

ब्राह्मी तु भारती भाषा गीर्वाग्वाणी सरस्वती।

इत्यारभ्य

सत्यं तथ्यमृतं सम्यगमूनि त्रिषु तद्वति।

इति पर्यन्तं त्रयोविंशतिश्लोकाः "वाग्वर्गः" इति नाम्ना, शिष्टं श्लोकचतुष्टयं "शब्दादिवर्गः" इति च विभज्य केचित् टीकाकाराः स्वीकुर्वन्ति। रामाश्रम्यादयः केचन टीकाकाराः एतादृशविभजनं विना शब्दादिवर्गः इत्येव पठन्ति।

उक्तं स्वर्व्योमदिक्कालधीशब्दादि सनाट्यकम्।
पातालभोगिनरकं वारि चैषाञ्च सङ्गतम्।।

इति वर्गनामप्रतिपादिकां कारिकाम् अनुसृत्य च वाग्वर्गः इति प्रत्येकवर्गनाम समीचीना नास्ति। एवं पातालभोगिवर्गः अपि "पातालवर्गः’’, "भोगिवर्गः" इति द्विधाकृत्य केचित् व्याख्यानमकुर्वन्। द्वितीये काण्डे '...वनौषधिमृगादिभिः' इति यदुक्तं सः वनौषधिवर्गस्तु रामाश्रमी-माहेश्वरी-अवरविवेकादयः प्रसिद्धाः टीकाः युगपत्कृत्येव स्वीकुर्वन्ति। किन्तु अमरकोशस्य बालप्रियाकारः तमनुकृत्य पारमेश्वरीकारश्च वनवर्गः ओषधिवर्गः इति द्विधा विभज्य पठति।व्याख्यानसौकर्यमेव एवं विधस्य विभजनस्य हेतुरिति तौ सूचयतः। अनया रीत्या अमरकोशस्य वर्गसंख्या सर्वत्र असमा एव।
वर्गक्रमे यादृशमसमत्वं दृश्यते तादृशमसत्वं श्लोकसख्यागणनायामपि भवति। अमरकोशव्याख्यानेषु रचनाकालानुसारं प्रायेण अर्वाचीना भवति पारमेश्वरी नाम केरलभाषाटीका। अस्य टीकाकारस्य काले समुपलब्धानि सर्वाण्यपि व्याख्यानानि स्वीकृत्य समुचितं पाठं गृहीत्वा तेन विरचितं भवति पारमेश्वरी इत्यनेन तस्मिन् व्याख्याने अन्यैः प्रदर्शितान् सर्वानपि श्लोकान् सोऽयं व्याख्याता स्वीकरोति।अतः श्लोकसंख्याविषये वैपुल्यमत्र दृश्यते। पारमेश्वर्यां टीकायां स्वीकृताः अधिकपाठाः अत्र वर्गानुसारं प्रदर्शयामि।
प्रथमकाण्डे १. स्वर्गवर्गः, २. व्योमवर्गः, ३. दिग्वर्गः, ४. कालवर्गः, ५. धीवर्गः, ६. शब्दादिवर्गः, ७. नाट्यवर्गः, ८. पातालभोगिवर्गः, ९. नरकवर्गः, १०. वारिवर्गः, इति क्रमेण दशवर्गाः सन्ति। (वर्गनामसुचका कारिका पूर्वमेवोव्क्ता)। तेषु स्वर्गवर्गे षोडशश्लोकाः, व्योमवर्गे एकम्, दिग्वर्गे पञ्च, कालवर्गे चत्वारः, घीवर्गे पञ्च, शब्दादिवर्गे द्वौ, नाट्यवर्गे अर्धः, पातालभोगिवर्गे सार्धैकः, वारिवर्गे एकः इति क्रमेण अधिकश्लोकाः समुल्लसन्ति। स्वर्गवर्गे एव अधिकपाठानाम् आधिक्यम्। देवतानां पर्यायकथनावसरे तत्सम्बन्धीनाम् अपराणां विषयानामपि कथनं कुर्वन्ति केचिदित्येददस्ति प्रथमवर्गस्य श्लोकाधिक्यस्य हेतुः। तथापि नरकवर्गे श्लोकार्धमपि प्रक्षिप्तेन न पश्यति।

द्वितीयकाण्डे तु-

वर्गाः पृत्थ्वीपुरक्ष्माभृद्वनौषधि मृगादिभिः।
नृब्रह्मक्षत्रविट्शूद्रैस्सांगोपाङ्गैरिहोदिताः ।।

इति वचनानुसारं
१. भूवर्गः, २. पुरवर्गः, ३. शैलवर्गः, ४. वनवर्गः, ५. ओषधिवर्गः, ६. मृगवर्गः, मनुष्यवर्गः, ८. ब्रह्मवर्गः, ९. क्षत्रियवर्गः, १०. वैश्यवर्गः, ११. शूद्रवर्गः, इति क्रमेण एकादशवर्गाः सन्ति। प्रायेण सर्वे संस्कृतव्याख्यातारः वनवर्गः ओषधिवर्गः इति विवेचनं विना उभयमपि एकीकृत्वा वनौषधिवर्गः इति पठन्ति। किन्तु पारमेश्वरीकारः द्विधाकृत्य वनसम्बन्धीनां विषयानां प्रदर्शनं वनवर्गे सस्यफलमूलादीनां प्रदर्शनम् ओषधिवर्गे च करोति। अतः एव अस्मिन् एकदशवर्गाः सन्ति। तत्रापि भूवर्गे श्लोकद्वयम्, पुरवर्गे सार्धश्लोकः, मृगवर्गे श्लोकार्धचतुष्टयम्, मनुष्यवर्गे अर्धश्लोकः, ब्रह्मवर्गे सार्धश्लोकद्वयम् च अधिकपाठत्वेन लभते। शैलवर्गे श्लोकमेकं पठति चेत् प्रक्षिप्तोऽयम् इति सूचना प्रत्येकं ददाति। वन-ओषधि-क्षत्रिय-वैश्य-शूद्रवर्गेषु अधिकपाठाः न सन्ति।

पुनश्च तृतीये काण्डे

विशेष्यनिघ्नैस्सङ्कीर्णैर्नानार्थैरव्ययैरपि।
लिङ्गादिसङ्ग्रहैर्वर्गाः सामान्ये वर्गसंश्रयाः।।

इत्युक्त्या १ विशेष्यनिघ्नवर्गः, २ सङ्कीर्णवर्गः, ३ नानार्थवर्गः, ४ अव्ययवर्गः, ५ लिङ्गादिसङ्ग्रहवर्गः इति क्रमेण वर्गपञ्चकमस्ति। तेषु यत्रकुत्रापि अधिकपाठाः न विद्यन्ते। एवम् अमरकोशपाठेषु अधिकपाठविवर्धनाय हेतुः तत्तत्सन्दर्भे पठितारः विषयानुबन्धानन्यानपि विषयान् यथासन्दर्भं संयोजयन्ति इत्येतदस्ति। यथा प्रथमकाण्डे दिग्वर्गे -

इन्द्रो वह्निः पितृपतिर्नैऋतिर्वरुणो मरुत्।
कुबेरः ईशः पतयः पूर्वादीनां दिशां क्रमात्।।
(१-३-३,४)
ऐरावत- पुण्डरीको वामनः कुमुदोञ्जनः।
पुष्पदन्तः सार्वभौमः सुप्रतीकश्च दिग्गजाः।।
(१-३-४,५)
करिण्योभ्रमुकपिलापिङ्गलानुपमाः क्रमात्।
ताम्रपर्णी शुभ्रदन्ती चाङ्गना चाञ्जनावती।।
(१-३-५,६)

इति अष्टदिक्पालकानाम्, दिग्गजानाम्, दिक्करिणीनां च नामानि यथाक्रमं सर्वेष्वपि मातृकाग्रन्थेषु दृश्यन्ते। ततःपरं केषुचित् ग्रन्थेषु

रविः शुक्रो महीसूनुस्स्वर्भानुर्भानुजो विधुः।
बुधो बृहस्पतिश्चैव दिशाञ्चैव तथा ग्रहाः।।

इति चास्ति। अष्टदिक्पालकानां तथा अष्टदिग्गजानाम् दिक्करिणीनां विवरणानन्तरं अष्टदिगधिपानाम् अष्टग्रहाणां स्मरणं औचित्यपूर्णम् अवश्यञ्च भवतीति चिन्तया केचिदनुयोज्यां कारिकां एवं विधं कृत्वा योजयन्ति।पूर्वस्मिन् सन्दर्भे माहेश्वर्यादिषु केषुचिद् ग्रन्थेषु दिगधिपानाम् अष्टग्रहाणां च नामानि पठन्ति। रामाश्रम्यां पाठमिदं न पश्यति। तथापि पारमेश्वरी श्लोकोयं प्रक्षिप्तः इति सूचनां दत्वा व्याख्यानं रचयति।
संस्कृतव्याख्यानेषु महेश्वरकृते अमरविवेके अधिकपाठस्य आधिक्यं दृश्यते। रामाश्रम्यां कुत्रचित् व्याख्यानावसरे अधिकपाठस्य सूचनां ददाति। अमरविवेककारः मूलश्लोकेन सह प्रकरणौचित्येन तत्र तत्र श्लोकान् प्रक्षेपयति। केरलेषु संस्कृतपठनारम्भे सिद्धरूपपठनम् तेन सह अमरकोशपठनम् च प्रचलति स्म। तत्तदवसरे देशिकेन विषयानुबन्धिनः केचन श्लोकाः अमरकोशकारिका रीत्या पाठ्यन्ते। एवं परम्परया मौखिकरूपेण प्रचलिताः श्लोकाः अपि केरलीयव्याख्यातारः प्राचीनकेरलीयपाठः इति विशेषनिर्देशेन अमरकोश्लोकैस्सह तेषामपि व्याख्यानं कुर्वन्ति।पारमेश्वरीकारः प्रतिश्लोकम् तेन स्वीकृतानाम् अधिकपाठानाम् आकरस्य सूचनां सर्वत्र ददाति। अयं महेश्वरपाठः, अयं प्राचीनकेरलीयपाठः, इत्यर्धं रामाश्रम्यां नास्ति इति परामर्शेन तेषामधिकपाठानाम् प्रामाणिकता व्यनक्ति।तृतीयकाण्डे अधिकपाठाः नास्तीति विषये प्रत्येकचिन्ता करणीया। अव्यय-नानार्थ-विशेषनिघ्नादीनां पदानां मध्ये एतादृशानां श्लोकानां प्रक्षेपणं कदापि अन्यूनं न भवति। कुत्रचित् केवलं प्रक्षिप्ताः श्लोकाः विद्यन्ते। तादृशाः श्लोकाः व्याख्यातारः मूलश्लोकैस्सह न पठन्ति। तेषां परिचायनं व्याख्यानावसर एव दत्तम्। एवम् अमरकोशस्य पारमेश्वरीव्याख्याने

प्रथमकाण्डे दशवर्गेषु आहत्य - ३०९.५ श्लोकाः
द्वितीयकाण्डे एकादशवर्गेषु आहत्य- ७४४.० श्लोकाः

अन्तिमे तृतीयकाण्डे वर्गपञ्चकेषु - ४८१.५ श्लोकाश्च सन्ति। एवं कोशे आहत्य २६ वर्गेषु १५३५ श्लोकाः इदानीं समुपलभ्यते।अतः इदानीमुपलब्धेषु अमरकोशपाठेषु वैपुल्येन व्याख्यानवैशिष्ट्येन पारमेश्वरीटीका बृहदाकारा बहूपकारप्रदा चेति निस्सन्देहं वक्तुं शक्यते इति शम्।।

## संदर्भ सूची


1. अमरकोशः - पारमेश्वरीटीका। टि.सी परमेश्वरन् मूस्सत्।
2. रामाश्रमीटीका। भानुजीदीक्षितः।
3. अमरविवेको नाम माहेश्वरीटीका।
4. बालप्रियाव्याख्याः विद्वान् कैक्कुलङ्गरा।
5. सर्वानन्दस्य टीकासर्वस्वम्।
6. अमरकोशस्य त्रिवेणी व्याख्या।